व्यालस्यं वै षोड़शकमाक्रोशश्च विशेषतः ।
सर्व्वस्य चाततायित्वमगारेष्वग्निदापनम् ॥
इच्छा च परदारेषु नरकाय निगद्यते ।
ईर्ष्याभावश्च सभ्येषु औद्धत्यन्तु विगर्हितम् ॥
एतैस्तु पापैः पुरुषः पुन्नामनरके पतेत् ।
पुन्नामनरकं घोरं विनाशं प्राह सर्व्वतः ॥
एतस्मात् कारणात् साध्यस्ततः पुत्त्रो निगद्यते ॥"
इति वामने ५८ अध्यायः ॥

पुप्फुलः, पुं, (पुप्फुस । पृषोदरादित्वात् सस्य लत्वम् ।) उदरस्थवायुः । इति भूरिप्रयोगः ॥

पुप्फुसः, पुं, (पुप्फुसवत् आकृतिरस्यास्तीति । अच् ।) पद्मबीजाधारः । तत्पर्य्यायः । बीजकोषः २ वराटकः ३ । (पुप्फुस इति शब्दोऽस्य ह्येति ।) वामपार्श्वस्थमलाशयः । फोँफड़ा इति फुलघरा इति च भाषा । तत्पर्य्यायः । कोठः २ । इति शब्दचन्द्रिका ॥ रक्तफेनजः ३ । इति हेमचन्द्रः ॥ तिलकम् ४ क्लोम ५ । इत्यमरः ॥ क्लोनम् ६ । इति भरतः ॥ फुप्फुसोऽपि पाठः ॥ (फुप्फुसशब्देऽस्य विषयो ज्ञातव्यः ॥)

पुमान् [स्] पुं, (पाति रक्षतीति । पा + "पातेर्डुम्सुन् ।" उणा० । ४ । १७७ । इति डुम्सुन् । डित्त्वात् टिलोपः ।) मनुष्यजातिपुरुषः । तत्पर्य्यायः । पञ्चजनः २ पुरुषः ३ पूरुषः ४ ना ५ । इत्यमरः । २ । ६ । १ ॥ (यथा,—
"स्वदेशजातस्य जनस्य लोके
गुणाधिके पुंसि भवत्यवज्ञा ।
निजाङ्गना यद्यपि रूपराशि-
स्तथापि पुंसां परदारचेष्टा ॥'
इत्युद्भटः ॥)
मनुष्यजातिः । इति केचिदिति भरतः ॥ पुंलिङ्गमात्रञ्च ॥ (कूटस्थपुरुषः । यथा, विष्णुपुराणे । १ । २ । २ ।
"सदक्षरं ब्रह्म य ईश्वरः पुमान्
गुणोर्म्मिसृष्टिस्थितिकालसंलयः ।
प्रधानबुद्ध्यादिजगत्प्रपञ्चसूः
स नोऽस्तु विष्णुर्गतिभूतिमुक्तिदः ॥"
"अक्षरमिति विकारं निराकरोति पुमान् कूटस्थः ।" इति तट्टीकायां श्रीधरस्वामी ॥)

पुर, श अग्रगत्याम् । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) श, पुरति ज्येष्ठः कनिष्ठस्य अग्रे गच्छतीत्यर्थः । पोरिता । इति दुर्गादासः ॥

पुरं, क्ली, (प्रियते पूर्य्यते इति । पॄ लि पूर्त्तौ + कः ।) गेहः । देहः । पाटलिपुत्त्रः । पुष्पादीनां दलावृत्तिः । इति मेदिनी । रे, ५८—५९ ॥ नागरमुस्ता । इति रत्नमाला ॥ चर्म्म इति शब्दरत्नावली ॥ गृहोपरिगृहम् । इति विश्वः ॥

पुरं क्ली स्त्री, (पिपर्त्तीति । पॄ + मूलविभुजादित्वात् कः । यद्वा, पुरति अग्रे गच्छतीति । पुर + "इगुपधज्ञाप्रीकिरः कः ।" ३ । १ । १३५ । इति कः ।) हट्टादिविशिष्टस्थानम् । इति श्रीधरस्वामी ॥ बहुग्रामीयव्यवहारस्थानम् । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः । पूः २ पुरी ३ नगरम् ४ पत्तनम् ५ स्थानीयम् ६ कटकम् ७ पट्टम् ८ निगमः ९ पुटभेदनम् १० । इति शब्दरत्नावली ॥ तस्य लक्षणादि यथा,—

मनुरुवाच ।

"राजा सहायसंयुक्तः प्रभूतयवसेन्धनम् ।
रम्यमानन्तु सामन्तं मध्यमन्देशमावसेत् ॥
वैश्यशूद्रजनप्रायमनाहार्य्यन्तथा परैः ।
किञ्चिद्ब्राह्मणसंयुक्तं बहुकर्म्मकरन्तथा ॥
अदेवमातृकं रम्यमनुरक्तजनान्वितम् ।
करैरपीड़ितं वापि बहुपुष्पफलन्तथा ॥
अगम्यं परचक्राणां तद्वासगृहमापदि ।
समदुःखसुखं राज्ञः सततं प्रियमास्थितम् ॥
सरीसृपविहीनञ्च व्याघ्रतस्करवर्ज्जितम् ।
एवंविधं यथालाभं राजा विषयमावसेत् ॥
एतद्दुर्गं नृपः कुर्य्यात् षसामेकतमं बुधः ।
वनदुर्गं महीदुर्गं नरदुर्गन्तथैव च ॥
वार्क्षञ्चैवाम्बुदुर्गञ्च गिरिदुर्गञ्च पार्थिव ! ।
सर्व्वेषामेव दुर्गाणां गिरिदुर्गं प्रशस्यते ॥
दुर्गञ्च परिघोपेतं चयाट्टालकसंयुतम् ।
शतघ्नीयन्त्रमुख्यैश्च शतशश्च समावृतम् ॥
गोपुरं सकवाटञ्च तत्र स्यात् सुमनोहरम् ।
सपताकं गजारूढो येन राजा विशेत् पुरम् ॥
चतस्रश्च तथा कार्य्या वीथयः सर्व्वतोमुखाः ।
एकस्मिंस्तत्र वीथ्यग्रे देववेश्म भवेद्दृढ़म् ॥
द्वितीये वापि वीथ्यग्रे राजवेश्म विधीयते ।
धर्म्माधिकरणं कार्य्यं वीथ्यग्रे च तृतीयके ॥
चतुर्थे चैव वीथ्यग्रे गोपुरन्तु विधीयते ॥
आयतं चतुरस्रं वा वृत्तं वा कारयेत् पुरम् ।
मुक्तिहीनं त्रिकोणञ्च यवमध्यन्तथैव च ॥
अर्द्धचन्द्रप्रकारञ्च वज्राकारञ्च कारयेत् ॥
अर्द्धचन्द्रं प्रशंसन्ति नदीतीरेषु तद्वसेत् ।
अन्यत्र तत्र कर्त्तव्यं प्रयत्नेन विजानता ॥
राज्ञा कारागृहं कार्य्यं दक्षिणे राजवेश्मनः ।
तस्यापि दक्षिणे भागे गजस्थानं विधीयते ॥
गजानां प्राङ्मुखा शाला कर्त्तव्या वाप्युदङ्मुखा ।
आग्नेये च तथा भागे आयुधागारमिष्यते ॥
महानसञ्च धर्म्मज्ञ ! कर्म्मशालास्तथापराः ।
गृहं पुरोधसः कार्य्यं वामतो राजवेश्मनः ॥
मन्त्रिवेदविदाञ्चैव चिकित्साकर्त्तुरेव च ।
तत्रैव च तथा भागे कोष्ठागारं विधीयते ॥
गवां स्थानं तथैवात्र तुरगाणान्तथैव च ।
उत्तराभिमुखा श्रेणी तुरगाणां विधीयते ॥
दक्षिणाभिमुखा वाथ परिशिष्टास्तु गर्हिताः ।
तुरगास्तु तथा धार्य्याः प्रदीपैः सार्व्वरात्रिकैः ॥
कुक्कुटान् वानरांश्चैव मर्कटांश्च नराधिप ! ।
धारयेदश्वशालायां सवत्सां धेनुमेव च ॥
अजाश्च धार्य्या यत्नेन तुरगाणां हितैषिणा ।
गोगजाश्वादिशालासु तत्पुरीषस्य निर्गमम् ।
अस्तं गते न कर्त्तव्यं देवदेवे दिवाकरे ॥
ततस्तत्र यथास्थानं राजा विज्ञाय सारथिम् ।
दद्यादावसथस्थानं सर्व्वेषामनुपूर्व्वशः ॥
योधानां शिल्पिनाञ्चैव सर्व्वेषामविशेषतः ।
दद्यादावसथान् दुर्गे मन्त्रकालविदां शुभान् ॥
गोवैद्यानश्ववैद्यांश्च गजवैद्यांस्तथैव च ।
आहरेत भृशं राजा दुर्गे परबलारुजः ॥
कुशीलवानां विप्राणां दुर्गे स्थानं विधीयते ।
न बहूनामतो दुर्गे विना कार्य्यं तथा भवेत् ॥
सर्व्वं निरर्थकं कार्य्यं विना दुर्गं महीपते ! ।
दुर्गे यन्त्राः प्रकर्त्तव्या नानाप्रहरणान्विताः ।
सहस्रघातिनो राजंस्तैस्तु रक्षा विधीयते ॥
दुर्गद्वाराणि गुप्तानि कार्य्याण्यपि च भूभुजा ।
सञ्चयश्चात्र सर्व्वेषामायुधानां विधीयते ॥
धनुषां क्षेपणीयानां तोमराणाञ्च भार्गव ! ।
शराणामथ खड्गानां कवचानान्तथैव च ॥
लगुड़ानाञ्च कुन्तानां परिघैः सह पार्थिव ! ।
अश्मनाञ्च प्रभूतानां मुद्गराणान्तथैव च ॥
त्रिशूलानां पट्टिशानां कुणपानाञ्च पार्थिव ! ।
प्रासानाञ्च सशूलानां शक्तीनाञ्च नरोत्तम ! ॥
परश्वधानां चक्राणां वर्म्मणाञ्चर्म्मभिः सह ।
कुद्दालरज्जुवेत्राणां पिटकानान्तथैव च ॥
तुंसुकानाञ्च दात्राणामङ्गारस्य च सञ्चयः ।
सर्व्वेषां शिल्पभाण्डानां सञ्चयश्चात्र इष्यते ॥
वादित्राणाञ्च सर्व्वेषामौषधीनान्तथैव च ।
यवसानां प्रभूतानामिन्धनस्य च सञ्चयः ॥
गुड़ानां सर्व्वतैलानां गोरसानान्तथैव च ।
वसानामथ मज्ज्ञानां स्नायूनामस्थिभिः सह ॥
गोचर्म्मपटहानाञ्च धान्यानां सर्व्वतस्तथा ।
तथैव पर्णटानाञ्च यवगोधूमयोरपि ॥
रत्नानां सर्व्ववस्त्राणां लौहानाञ्चाप्यशेषतः ।
कलायमुद्गमाषाणां चणकानां तिलैः सह ॥
तथा च सर्व्वशस्यानां पांशुगोमययोरपि ।
शणसर्ज्जरसं भूर्जजतुलाक्षाञ्च टङ्कणम् ॥
राजा सञ्चिनुयाद्दुर्गे यच्चान्यदपि किञ्चन ॥ * ॥
कुम्भाश्चाशीविषाः कार्य्या व्यालसिंहादयस्तथा ।
मृगाश्च पक्षिणश्चैव विरुद्धा ये परस्परम् ॥
स्थानानि च विरुद्धानां सुगुप्तानि पृथक् पृथक् ।
कर्त्तव्यानि महाभाग ! यत्नेन पृथिवीक्षिता ॥
उक्तानि चाप्यनुक्तानि राजद्रव्याण्यशेषतः ।
सुगुप्तानि पुरे कुर्य्याज्जनानां हितकाम्यया ॥
जीवकर्षभकाकोलीश्यामलक्यः परूषकम् ।
शालपर्णी पृश्निपर्णी मुद्गपर्णी तथैव च ॥
माषपर्णी च मेदे द्वे शारिवे द्वे बलात्रयम् ।
वीरा श्वसन्ती वृष्या बृहती कण्टकारिका ॥
शृङ्गी शृङ्गाटकी द्रोणी वर्षाभूर्दर्भरेणुका ।
मधुपर्णी विदार्य्यौ द्वे महाक्षुद्रा महातपा ॥
धन्वना सह देवाह्वा कटुकैरण्डकं विषम् ।
पर्णाशनाकम्दूरीका फलगुखर्ज्जूरयष्टिका ॥
शुक्रातिशुक्रकाश्मर्य्यच्छत्रातिच्छत्रवीरणाः ॥
इक्षुरिक्षुविकाराश्च फाणिताद्याश्च सत्तम ! ।
सिंही च सहदेवी च विश्वेदेवाटरूषकम् ॥
मधुकं पुष्पकं साक्षा शतपुष्पा मधूलिका ।
शतावरीमधूके च पियालन्तालमेव च ॥
आत्मगुप्ता कट्फलाख्या दारदा राजशीर्षिका ।
राजसर्षपधन्याकमृष्यप्रोक्ता तथोत्कटा ॥